# संस्कृत वाङ्मय चिन्तन

डॉ० बाबूलाल मीना



**डॉ० बाबूलाल मीना**

**पिता** - श्री रामजी लाल मीना; **माता** - श्रीमती बिसिनी मीना

**पत्नी** - डॉ० आशा सिंह रावत, असिस्टेण्ट प्रोफेसर संस्कृत, ग्वालियर (म०प्र०)

**पुत्र** - प्रणव (आयुष, कृष्णा)

**जन्म दिनांक, स्थान और स्थायी पता**- 04.07.1973, ग्राम कैमा, तहसील नादौती, जिला करौली (राजस्थान) पिन- 322215, **शिक्षा एवं योग्यताएं**- स्नातकोत्तर कक्षा- संस्कृत विभाग, राज० विश्व० जयपुर से, एम०ए० संस्कृत परीक्षा 1996 में विश्वविद्यालय मेरिट में **प्रथम स्थान** होने से **स्वर्णपदक** प्राप्त, यू०जी०सी०जे०आर०एफ० एवं **साहित्याचार्य** राज० विश्व० जयपुर (राजस्थान) से तथा **पीएच० डी०** काशी हिन्दू विश्वविद्यालय, वाराणसी, उ०प्र०से हुई। रा०लो०से०आयोग अजमेर से 1997 में महाविद्यालय शाखा (राज० शिक्षा सेवा) में चयन एवं डूँगरपुर में पदस्थापन। **कार्य/अध्यापन अनुभव**- 22 वर्ष।

**सम्मान**- राजस्थान संस्कृत अकादमी जयपुर से वर्ष 2006-07 का सम्पूर्ण राजस्थान के महाविद्यालय स्तर का **श्रेष्ठ संस्कृत शिक्षक सम्मान**, ग्वालियर साहित्य संस्थान, ग्वालियर (म०प्र०) का **साहित्य सम्मान** 2018, शिक्षा संकल्प संस्थान भरतपुर (राज०) द्वारा **शिक्षक सम्मान** 2019, **प्रकाशित पुस्तकें**- 1. सरल संस्कृत व्याकरण, 2. स्नातक संस्कृत व्याकरण, 3. ऋतुशतकम् का अनुवाद, सम्पादन एवं परिशीलन, 4. झाँसीराज्ञीशतकम् और श्रीलालबहादुरशास्त्रिशतकम् अनुवाद, सम्पादन एवं समीक्षा, 5. संस्कृत वाङ्मय चिन्तन और 6. संस्कृत साहित्य चिन्तन। **अन्य प्रकाशन** - विविध जर्नल्स, पुस्तकों और अभिनन्दन ग्रन्थों में अनेक शोध पत्र प्रकाशित, विभिन्न राष्ट्रीय एवं अन्तर्राष्ट्रीय शोध संगोष्ठियों और सम्मेलनों में अनेक शोध पत्र प्रस्तुत, विभिन्न राष्ट्रीय कार्यशालाओं में सहभागिता, प्राची प्रज्ञा Online Research Journal, चिन्तन और प्रमाण रोहतक (हरियाणा), त्रिपथगा (वाराणसी), संस्कार चेतना (कुरुक्षेत्र) आदि यू०जी०सी० अप्रूव्ड लिस्टेड जर्नल्स में सम्पादक/परामर्श मण्डल सदस्य।

**सम्प्रति/वर्तमान पद** - एसोसिएट प्रोफेसर, स्नातकोत्तर संस्कृत विभाग, महारानी श्री जया राजकीय स्नातकोत्तर महाविद्यालय, भरतपुर (राजस्थान), पिन-321001, मो०नं० 9414861283, 9589856262

**अन्य** - संस्कृत के प्रचार प्रसार हेतु दृढ संकल्पित एवं समर्पित।

e-mail: babulal.sanskrit@gmail.com or sanskrit.babulal@gmail.com

**EASTERN BOOK LINKERS**
(INDOLOGICAL PUBLISHERS & BOOKSELLERS)
HO.: 5825, New Chandrawal, Jawahar Nagar,
Delhi-110007 Ph.: 23850287, 09811232913
Showroom: 4806/24, Bharat Ram Road,
Ansari Road, Darya Ganj, New Delhi-110002
Phone: 23285413
e-mail: eblindology@gmail.com
ebl.info76@gmail.com
website: www.eblindology.com

ISBN: 978-93-89386-04-2
9 789389 386042

3.4 मुरारि के अनर्घराघवम् नाटक में अद्भुत रस विवेचन
डॉ० आशा सिंह रावत, अशोक कुमार मीना 233

**चतुर्थ अध्याय : महाकाव्य विषयक चिन्तन**

4.1 संस्कृत साहित्य में काव्य एवं महाकाव्य का लक्षण
डॉ० जी. एल. पाटीदार 240

4.2 रघुवंशे अर्थान्तरन्यासवैभवम्
*Dr. Sayanto Mahato* 247

**पञ्चम अध्याय : व्याकरण विषयक चिन्तन**

5.1 व्याकरणादलंकार प्रवर्तते
डॉ० किरण आर्या 257

5.2 चत्वारि वाक् परिमिता पदानि
डॉ० मनमोहन सैन 262

5.3 मधुसूदन ओझा की दृष्टि में अयोगवाह विचार : एक समीक्षा
डॉ० समय सिंह मीना, श्रीमती प्रेमलता मीणा 267

**षष्ठ अध्याय : नाट्यशास्त्र एवं काव्यशास्त्र विषयक चिन्तन**

6.1 नाट्यशास्त्र में प्रतिबिम्बित सामाजिक सन्देश
डॉ० टेकचन्द मीणा 284

6.2 संस्कृत काव्यशास्त्र में काव्यशरीर सम्बन्धी नवीन अभिवृत्तियाँ
डॉ० अनीता 288

6.3 संस्कृत काव्यशास्त्र में भाव की अवधारणा
डॉ० घनश्याम बैरवा 303

6.4 संस्कृत साहित्य में आदर्श नेता के गुण
डॉ० रामहेत गौतम 308

6.5 पाश्चात्य सन्दर्भों में सौन्दर्यशास्त्र का स्वरूप
पूनम रानी 319

**सप्तम अध्याय : विविध विषयक चिन्तन**

7.1 संस्कृत पत्रिकायें एवं बाल काव्य रचनायें
डॉ० लाला शंकर गयावाल 329

पञ्चम अध्याय

# व्याकरण विषयक चिन्तन

## 5.1

## व्याकरणादलंकार प्रवर्तते

**डॉ० किरण आर्या**
सहायक प्राध्यापिका संस्कृत-विभागः, डॉ. हरिसिंह गौर विश्वविद्यालय,
सागरम् (म०प्र०)

विश्वेऽस्मिन् अलंकारस्य महिमा विशालतमः। न केवलं मानवा आत्मानमलंकुर्वन्ति, स्वकायमलंचिकीर्षितुं चेष्टन्ते, अपितु प्रकृतिरपि नानाविधेभ्यः वर्णेभ्यः वर्णसंयुतपुष्पेभ्यः आत्मानं रंजयति, निजसौन्दर्येण विभावयति। प्रातःकालादेव अरुणरक्तिमां धारयन् भुवनभास्करः नापि प्रकृतेरलंकारत्वमवलोकयितुं मध्ये समायात्यपितु तस्याः अलंकारत्वमपि विवर्धयति। तामेव अलंकारविद्यां सकलं प्रकृतितरनुशिक्षमाणाः कवयः विद्वांसः चिन्तकाः कलाकाराः शिल्पिनः नाटककाराः अस्यां धरायां संबभूवुः विलसन्ति च। एते स्वरचनाः शब्दरचनाश्च स्वाभिनयं च नैकंविधेभ्योऽलंकारेभ्यः अभिरंजयितुमीषते। यत्किमपि ते लिखन्ति तदलंकुर्वन्ति। कश्चन वक्ता हृदयाकर्षकवचनाभिप्रायेण स्वगिरमलंकरोति। अलंकारेण क्वचिदप्येका जीवनी शक्तिरायाति तत्र सजीवत्वस्य दर्शनं बोभवीति। तमेव चमत्कारमिति कथयितुं शक्यते। अलंकारस्यालंकारत्वन्तदैव यदा तच्चमत्कारेण मण्डितं स्यात्।

आचार्यमम्मटः अलंकारं परिभाषयत्येवम्-

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलंकारास्तेऽनुप्रासोपमादयः ।।**

अर्थात् ये काव्येषु विद्यमानं रसं शब्दार्थरूपि-अंगैरुत्कर्षयन्ति तेऽलंकारा उच्यन्ते। काव्येषु काव्यशास्त्रिणः रसाद्यभिव्यंजकयोः शब्दार्थयोश्चारुतामुत्पन्नाय गुणालंकारादीनां सविस्तरं वर्णनं कुर्वन्ति।

कस्मिन्नपि शास्त्रे प्रतिपादितायाः विचारधारायाः मूलमुत्सं ज्ञातुं यदि वयं प्रश्नमुखाः भवामस्तर्हि वेदा एव तत्रोत्तमपक्षरूपेणाभिमुखाः भवन्ति। यतोहि वेदा

एवास्माकं प्राच्याः सर्वमान्या अपि च सर्वविद्यानां कोषाः, सर्वविचाराणां प्रदातारः सन्ति।

सर्वविषयाणां सिद्धान्तानां बीजबिन्दवस्तत्र समुपलभन्ते। अनयैव दृश्या अलंकारस्यापि मूलस्वरूपं वेदेषु वयं सर्वप्रथममीक्षामहे। सर्वालंकारेषु उपमालंकारस्य महत्त्वं वरीवर्त्ति। वेदेष्वपि अनेकेषु अलंकारेषु सत्सु उपमालंकारः वरीवर्त्तितमाम्। यदा वयं वेदस्योषस्सूक्तमधीमहे तदोपमायास्सौन्दर्यं ध्यायं ध्यायं मोदामहे। '**सूर्यो देवी उषसं रोचमाना मर्यो न योषमभ्येति पश्चात्**'[1] अत्र एकया सुन्दरयुवत्या सह उषसः उपमा दीयते। नैतावदेव खलु, एकस्यामृचि सहैव चतस्रः उपमा सन्ति। द्रष्टव्यन्तावत् -

**अभ्रातेव पुंस एति प्रतीची गर्तारुरिव सनये धनानाम्।**
**जायेव पत्य उशती सुवासा उषा हृदेव निरिणीते अप्सः।।**[2]

एवं चोपमालंकारातिरिक्तमनेकेऽलंकाराः अतिशयोक्तिविरोधाभास व्यतिरेकश्लेषादयः (नैव नामतः) वेदेषु प्रयुक्ताः। ततश्च निरुक्तशास्त्रे यास्ककारः स्पष्टरूपेण उपमाबोधकानां इव, यथा, न, चित्, नु, आ सदृशानां निपातानां प्रयोगविवेचनं कृतवानस्ति। तथा च तेषां निपातानां प्रयोगपूर्वकाः वेदमन्त्रा अपि यास्केन निरुक्ते व्याख्याताः। गार्ग्यस्यापि एतदेव मतमित्युक्त्वा यास्केनान्याचार्याणां प्राच्यानामपि तत्र सहमतिरिति प्रमाणिता।

तस्मिन्नेव क्रमे व्याकरणस्य उपज्ञकं महर्षिपाणिनिं वयमिह स्मरामः। महर्षिपाणिनिना सर्वेष्वलंकारेषु प्रधानभूतः अलंकारः उपमालंकारः विधिवद्विवेचितः। यथा आचार्यमहिमभट्टः '**सर्वेष्वलंकारेषु जीवितायते**' उक्त्वा उपमालंकार प्रधानमिति मन्यते। आचार्यपाणिनिः स्वकीयायामष्टाध्याय्यां उपमालंकारस्य सहयोगिनां उपमानोपमेयादितत्त्वानां व्याख्यामनेकेषु सूत्रेषु प्रस्तौति। तत्र सर्वप्रमुखं सूत्रं विद्यते - **उपमानानि सामान्यवचनैः**[3] सूत्रमिदं तत्पुरुषसमासविधायकं सूत्रं विद्यते। अस्मिन् सूत्रे उपमालंकारस्य प्रयोजकाः के सन्तीति वर्णयन् पाणिनिः - उपमेयः, उपमानम्, साधारणधर्मः, साधारणधर्मस्य वाचकः शब्दः, इत्येते चत्वारः उपमायाः प्रयोजका इति मन्यते। येन वस्तुना कस्यचिदुपमा दीयते तद्वस्तु उपमानं भवति, यस्य चोपमा दीयते तदुपमेयः भवति, यं विशेषगुणमाधाय उपमेये उपमानस्य साम्यं प्रदर्श्यते तत्साधारणधर्मो

1. ऋ.1.24.6
2. ऋ.1.24.7
3. पा. सू. 2.1.55

भवति तथा च यः शब्दः तयोः साम्यं प्रकटयति सस्तद्वाचकशब्दो भवति। उपमायाः प्रयोगः प्रायशः उपमेयस्य उत्कर्षप्रतिपादनाय क्रियते। यदा घनश्यामो देवदत्तः इत्यत्र घनेन देवदत्तस्योपमा दीयते तदा देवदत्ते उत्कर्षप्रतिपादनं विवक्षितम्भवति। घन इव श्यामः देवदत्तः इति घनश्यामो देवदत्तः विग्रहेऽस्मिन् घनशब्दः उपमानं, देवदत्तशब्दः उपमेयः, तयोश्चोपमानोपमेययोः विद्यमानः धर्मः 'श्यामत्वम्' साधारणधर्मः, विग्रह. स्थितः इवशब्दः साधारणधर्मवाचकशब्दोऽस्ति।

सूत्रेऽस्मिन् उपमानशब्दस्य पारिभाषिकार्थे प्रयोगः विद्यते अस्योपमानशब्दस्य व्याख्यायां महर्षिपतंजलिः वैज्ञानिकं विवेचनं प्रस्तौति। तत्र किमुपमानम्? कः उपमेयः? किं यदेवोपमानं तदेवोपमेयम्, आहोस्विदन्यदेवोपमानमन्यदुपमेयम्? यदि यदेवोपमानं तदेवोपमेयम्, तर्हि क इहोपमार्थः – गौरिव गौरिति, यतोहि साधारणधर्मस्य गोत्वस्यैक्येन गौरिवेत्यस्य वैयर्थ्यं भवति। अथवा अन्यदेवोपमानम् अन्यदुपेमयमिति विचारितेऽपि क इहोपमार्थः भवति – गौरिवाश्वः अत्र अत्यन्तभेदे सत्यपि कथमुपमां कर्तुं शक्यते एवं चात्यन्तभेदेऽत्यन्ताभेदे उपमायाः अनुपन्नत्वादुपमालंकारः न प्रवर्तते। समाधीयते तदा भाष्ये – **एवं तर्हि किंचित्सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेये भवतः**। एवं चोदाहरणेश्यामगुणस्य भेदेऽपि श्यामत्वेनैक्यात्सामान्यत्वं साधारणधर्मतेति ध्वनितम्। एतत् कथं प्रतिपत्तुं शक्यमिति सूत्रे माने हि नामानिर्ज्ञातज्ञानार्थमुपादीयते - **अनिर्ज्ञातमर्थं ज्ञास्यामीति**। तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति। गौर्निर्ज्ञातः गवयोऽनिर्ज्ञातः। अभिप्रायोऽत्र समासतः भाष्यकारस्यैवं विद्यते यत् उपमानोपमेययोर्मध्ये भेदाभेदरूपसम्बन्धः भवितव्यः, उभयोश्च कश्चिद्गुणादिधर्मः सामान्यः कश्चिच्च विशेषो भवेदिति। अस्य सर्वस्य उपमानोपमेयस्य व्याख्याने भाष्यकारस्यायमप्यभिप्रायः यत् अनिर्ज्ञातार्थज्ञानाय उपमानस्य प्रयोगो भवति तत्रोपमेयस्य धर्मज्ञानं नावश्यकं यतोहि उपमानस्य ज्ञातधर्मैस्य ज्ञानं भवत्येव। इमामेव भावनामाधृत्य साहित्येषु कविमनःसु उपमालंकारः प्रवृत्तो भवति। आचार्यभर्तृहरिरपि महाभाष्याकारानुरूपमेव स्वकीये ग्रन्थे वाक्यपदीये उपमानोपमेययोः व्याख्यां चकार–

**अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मानमुच्यते।**
**प्रस्थादि तेन मेयात्मा साकल्येनावधार्यते।।**
**अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते।**
**साकल्येनपरिज्ञानादुपमानं तदुच्यते।।**[1]

1. वा.3 वृ. स. 360–361

अर्थात् मानं तत् येन अनिर्ज्ञातवस्तुनः पूर्णतया ज्ञानं भवेत्। यथा प्रस्थादिमापकसाधनैः कस्यचिन्मेयवस्तुनः मानं साकल्येन भवति। उपमानेन अनिर्ज्ञातद्रव्य इव धर्माणां ज्ञानं साकल्येन न स्यात् किन्तु उपमानं तस्य ज्ञानस्य माध्यमं भवति। अतः द्रव्यस्यानिर्ज्ञातस्य उपमानद्वारा ज्ञानं कार्यते। अनेन उपमेयस्वरूपं स्पष्टं भवति।

साहित्यशास्त्रिभिश्च उपमानोपमेययोरिदमेव स्वरूपमभिप्रेतं विद्यते। अलंकारसर्वस्वकारेण पतंजलेरभिप्रायं स्वशब्दैः वर्णयतोच्यते –

**यत्र किंचित्सामान्यं कश्चिच्च विशेषः स विषयः सदृशतायाः।**[1]

अतः साहित्यशास्त्रिणोऽप्येवमंगीकुर्वन्ति यत् भेदाभेदारूपोपमानोपमेययोः उत्कर्षापकर्षनिर्णायकमिति न मत्वा किंचित्सामान्यं कश्चिच्च विशेषधर्मः उपमानोपमेयस्य प्रयोजक इति भवितव्यः।

**उत्प्रेक्षालंकारः**

क्रियया सह यत्र इव शब्दस्य प्रयोगः भवति तत्र नास्ति उपमा इत्यवगन्तव्यमिति महाभाष्यकारः पतंजलिः '**धातोः कर्मणः समानकर्तृकादिच्छायां वा**'[2] सूत्रे - **न वै तिङन्तेनोपमानमस्ति**' इति वाक्येन स्पष्टयति। क्रियापदेन सह इवशब्दस्य प्रयोगे केवलं सम्भावनार्थस्य प्रतीतिर्भवति अत एव रोदितीव गायति, नृत्यतीव गच्छति, आदिवाक्येषु उपमा न भूत्वा क्रियास्वरूपोत्प्रेक्षा मन्यते – **इवशब्दप्रयोगे तु आरोपस्तु विद्यते रोदितीव गच्छति, नृत्यतीव गच्छति इति**[3] यतोहि उत्प्रेक्षायाः लक्षणमिदमेव – **उपमानोपमेयस्य सम्भावनमुत्प्रेक्षा।** वाक्यपदीयकारोऽपि पतंजलेर्वचनं प्रपंचयति –

**साध्यस्यापरिनिष्पत्तेः सोऽमित्यनुपग्रहः।**
**तिङन्तैरन्तरेणैवमुपमानं ततो न तैः।।**[4]

अत्र भर्तृहरिः स्पष्टयति यत् कथन्नहि तिङन्तेनोमिमीते? यतोहि तिङन्तार्थस्य साध्यरूपत्वात् अपरिनिष्पन्नरूपस्तस्य भवति अतः सः उपमानस्य उपमेयेन सह सोऽयम् इत्याकारकः परामर्शः न कर्तु पारयति। अतः सिद्धरूपे यत् सोऽयम् इत्याकारपरामर्शज्ञानं भवति तस्यानुपपन्नत्वात् क्रियया सह क्रियायाः उपमा

---

1. अ.स.पृ. 31
2. पा. सू. 3.1.7
3. महा भा. 3.1.7
4. वा.प.3 53

न कर्तुं शक्यते। यथा 'सिंहो माणवक:' अत्र इवशब्दस्य प्रयोगेऽप्रयोगेऽपि भेदाभेदरूपस्य उपमानोपमेयभाव: अधिगम्यते तथैव क्रियासु इवशब्दस्य प्रयोगाप्रयोगे अभेदाभेदज्ञानं न भवितुं शक्यते। अत: क्रियायामुपमामस्वीकृत्य वैयाकरणास्तत्रोत्प्रेक्षां मन्यन्ते। तस्मादेव साहित्यशास्त्रिण:- 'लिम्पतीव तमोऽंगानि वर्षतीवांजनं नभ:' अत्रोत्प्रेक्षालंकार: मन्वते।

परिसंख्यालंकार: -

**किंचित्पृष्टमपृष्टं वा कथितं यत् प्रकल्पते।**
**तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता।।**[1]

एतल्लक्षणं परिसंख्यालंकारस्य विद्यते। अत्र परिशब्द: वर्जनार्थे प्रयुक्त: विद्यते अपि च संख्याशब्द: बुद्ध्यर्थे प्रयुक्त:। अत: वर्जनबुद्धे परिसंख्या विद्यते। तत्र आचार्यपाणिनिना परिशब्द: वर्जनार्थे प्रथमतया एव प्रयुक्त: ' **परेर्वर्जने**'[2] सूत्रे वर्जनेऽर्थे द्योत्ये परिशब्दस्य तत्र द्वित्वं विहितं विद्यते - परि परि त्रिगर्तं वृष्टो देव:, यस्यार्थ: भवति त्रिगर्तदेशं त्यक्त्वान्यत्र मेघोऽवर्षदिति। एवं पाणिन्यनुसारं परिशब्दस्य वर्जनार्थकतात्र सिध्यति।

एवं च वयमिह द्रष्टुं शक्नुम: यत् व्याकरणे अलंकारा: प्रयुक्ता एव, मया तु किंचित्यथामत्या अत्र प्रस्तुता: अन्येऽप्यलंकारा: व्याकरणस्य गहनाध्ययनेन ज्ञातुं शक्या:। जाम्बवतीविजयमहाकाव्यस्य रचयिता पाणिनि: कथन्नहि अलंकारमर्मज्ञ: स्यादिति तस्य व्याकरणेऽपि अलंकारस्य छटा यत्र तत्र दरीदृश्यत एव।

---

1. काव्यप्रकाश:, पृ० 703
2. पा. सू. 8.1.5